द्वितीयं त्रिपुरारूपं तथैव तु तृतीयकम् ।
आवाहनार्थं देव्यास्तु चिन्तयेत् योनिमुद्रया ॥
बन्धूकपुष्पसङ्काशां जटाजूटेन्दुमण्डिताम् ।
सर्व्वलक्षणसम्पूर्णां सर्व्वालङ्कारभूषिताम् ॥
उद्यद्रविप्रख्यवस्त्रां पद्मपर्य्यङ्कसंस्थिताम् ।
मुक्तारत्नावलीयुक्तां पीनोन्नतपयोधराम् ॥
वलीविभङ्गचतुरामासवामोदमोदिताम् ।
नेत्राह्लादकरीं शुद्धां क्षोभिणीं जगतां तथा ॥
त्रिनेत्रां योगनिद्रां यामीषद्धाससमायुताम् ।
नवयौवनसम्पन्नां मृणालाभचतुर्भुजाम् ॥
वामोर्द्ध्वे पुस्तकं धत्ते अक्षमालान्तु दक्षिणे ।
वामेनाभयदां देवीं दक्षिणाधोवरप्रदाम् ॥
प्रस्रवद्रक्तसूर्य्याभां शिरोमालान्तु बिभ्रतीम् ।
आपादलम्बिनीं कल्पद्रुममासाद्य संस्थिताम् ॥
कदम्बोपवनान्तःस्थां कामाह्लादकरीं शुभाम् ।
द्वितीयां त्रिपुरां ध्यायेदेवं रूपां मनोहराम् ॥*॥
तृतीयं त्रिपुरारूपं शृणु वेतालभैरव ! ।
जवाकुसुमसङ्काशां मुक्तकेशीं वराननाम् ॥
सदाशिवं हसन्तन्तु प्रेतवद्विनिधाय वै ।
हृदये तस्य देवस्य ह्यर्द्धपद्मासनस्थिताम् ॥
रक्तोत्पलैर्म्मिश्रितान्तु मुण्डमालां पदानुगाम् ।
ग्रीवायां धारयन्तीन्तु पीनोन्नतपयोधराम् ॥
चतुर्भुजां तथा नग्नां दक्षिणोर्द्ध्वेऽक्षमालिनीम् ।
वरदां तदधो वामे जगन्मायां तथाभयम् ॥
अधस्तु पुस्तकं धत्ते त्रिनेत्रां हसिताननाम् ।
स्रवद्विषभोगार्त्तां तथा सर्व्वाङ्गसुन्दरीम् ॥
एवंविधं तृतीयन्तु रूपं ध्यायेत्तु पूजकः ।
आद्यन्तु वाग्भवं रूपं द्वितीयं कामराजकम् ॥
डामरं मोहनञ्चापि तृतीयं परिकीर्त्तितम् ।
एकैकन्तु त्रिरूपाणि प्राग्विचिन्त्याथ साधकः ॥
मन्त्रत्रयेण प्रत्येकं हृदि षोड़शकैस्तथा ।
पूजयेदुपचारैस्तु बहिर्य्यद्वत्तथैव च ॥"
इति कालिकापुराणे ६२ अध्यायः ॥
(अस्याः वीजम् । "हसरैं" "हसकलरीं" "हसरौं" इति मन्त्रकोषः ॥ ऋग्वेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।"सहोवाच श्रीरामः । ऐतरेयकौषीतकीनादविन्द्वात्मप्रबोधनिर्व्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृचानामृग्वेदगतानां दशसंख्यकानामुपनिषदां वाङ्मे मनसीति शान्तिः ॥" नगरीविशेषः । यथा, महाभारते । ३ । २५३ । ८ ।
"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा ।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")
त्रिपुरान्तकः, पुं,, (त्रिपुरस्य अन्तकः ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, काशीखण्डे १०० अध्याये ।
"लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ॥"
तथाच महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे ।
"आशुतोषो मित्रमध्ये शत्रूणां त्रिपुरान्तकः ॥")
त्रिपुरी, स्त्री, देशविशेषः । त्रिपुरा इति ख्याता । तत्पर्य्यायः । चैदिनगरी २ । इति हेमचन्द्रः । ४ । ४१ ॥

त्रिपुषा, स्त्री, (त्रीन् वातादिदोषत्रयान् पुष्णातीति । पुष+कः । ततष्टाप् ।) कृष्णत्रिवृत् । इति शब्दचन्द्रिका ॥
त्रिपृष्ठः, पुं, (त्रयो वंशाः पृष्ठे पश्चिमप्रदेशेऽस्येति ।) राजभेदः । तत्पर्य्यायः । प्राजापत्यः २ । इति हेमचन्द्रः । ३ । ३५८ ॥
त्रिफला, स्त्री, (त्रयाणां फलानां समाहारः । अजादित्वात् "द्विगोः ।" ४ । १ । २१ । इति न ङीप् ।) मिलितसमभागहरीतकीविभीतकामलकीफलानि । तत्पर्य्यायः । त्रिफली २ फलत्रयम् ३ फलत्रिकम् ४ । इति राजनिर्घण्टः ॥ अस्या गुणाः । त्रिदोषनाशित्वम् । नात्युष्णत्वम् । मलभेदित्वञ्च । इति राजवल्लभः ॥ तन्नामगुणाः ।
"पथ्याविभीतधात्रीणां फलैः स्यात्त्रिफला समैः ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥
त्रिफला कफपित्तघ्नी मेहकुष्ठहरा सरा ।
चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी ॥"
इति भावप्रकाशः ॥
("हरीतक्यास्त्वामलक्या विभीतस्य फलन्तथा ।
त्रिफलेत्युच्यते वैद्यैर्वक्ष्यामि भागनिर्णयम् ॥
एकभागं हरीतक्या द्वौ भागौ च विभीतकम् ।
आमलक्यास्त्रिभागञ्च सहैकत्र प्रयोजयेत् ।
त्रिफला कफपित्तघ्नी महाकुष्ठविनाशिनी ॥
आयुष्या दीपनी चैव चक्षुष्या व्रणशोधिनी ।
वयःप्रदायिनी दृष्टा विषमज्वरनाशिनी ॥
सर्व्वरोगप्रशमनी मेधास्मृतिकरी परा ।
वक्ष्यामि योगयुक्तिञ्च रोगे रोगे पृथक् पृथक् ॥
वाते घृतगुड़ोपेता पित्ते समधुशर्करा ।
श्लेष्मणि त्रिकटूपेता मेहे समधुवारिणा ॥
कुष्ठे च घृतसंयुक्ता सैन्धवेनाग्निमान्द्यहा ।
चक्षुर्व्वामकेन क्वाथो नेत्ररोगनिवारणः ॥
घृतेन हरते कण्डूं मातुलुङ्गरसैर्वमिम् ।
गुल्मार्शः शूरणगुड़ैः सद्यः स्याद्गुणकारकः ॥
क्षीरेण राजयक्ष्माणं पाण्डुरोगं गुड़ेन च ।
भृङ्गराजरसेनापि घृतेन सह योजितः ॥
वलीपलितहन्ता च तथा मेधाकरः स्मृतः ।
सक्षीरः सगुड़ः क्वाथो विषमज्वरनाशनः ॥
सशर्कराघृतक्वाथः सर्व्वजीर्णज्वरापहः ॥
एषा नराणां हितकारिणी च
सर्व्वप्रयोगे त्रिफला स्मृता च ।
सर्व्वामयानां शमनी च सद्यः
सतेजकान्तिं प्रतिमां करोति ॥
शोथे तथा कामलपाण्डुरोगे
तथोदरे मूत्रयुता हिता च ।
हितातिसारे ग्रहणीविकारे
हिता च तक्रेण फलत्रिका च ॥
क्षीणेन्द्रिये यक्ष्मणि जीर्णरोगे
क्षीरेण युक्ता त्रिफला हिता च ।
स्यान्नेत्ररोगे च शिरोगदे च
कुष्ठे च कण्डूव्रणपीड़िते च ।
मूत्रग्रहे कामलकेऽग्निमान्द्ये
हिता जलेन त्रिफला हि कल्कः ॥
स शीतकाले गुड़नागरेण
सशर्करा क्षीरयुता तथोष्णे ।
वर्षासु शुण्ठी सहिता नराणां
फलत्रिका सर्व्वरुजाहरा स्यात् ॥"
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे कल्पस्थाने त्रिफलाकल्पोनाम द्वितीयोऽध्यायः ॥)
त्रिफली, स्त्री, त्रिफला । इति राजनिर्घण्टः ॥
त्रिवलीकं, क्ली, (तिस्रो वल्यो यत्र । कप् ।) पायुः । इति हेमचन्द्रः । ३ । २७६ ॥
त्रिभण्डी, स्त्री, (त्रीन् वातादिदोषान् भण्डति परिहसतीति । भण्ड परिहासे+अण् । ततो ङीप् ।) त्रिवृता । इत्यमरः । २ । ४ । १०८ ॥ (पर्य्यायोऽस्या यथा,—
"त्रिवृद्वृकाक्षी सुवहा त्रिभण्डी त्रिपुटा च सा ।
शाश्वादनी कूटरणा निःसृता त्रिवृता कथा ॥"
इति वैद्यकरत्नमालायाम् ॥
यथाच सुश्रुते चिकित्सितस्थाने । १७ ।
"श्यामा त्रिभण्डी त्रिफला सुसिद्धं
हरिद्रयो रोध्रकटुत्रयोश्च ।
घृतं सदुग्धं प्रणतर्पणेन
हन्याद्गतिं कोष्ठगतापि या स्यात् ॥")
त्रिभद्रं, क्ली, (त्रिषु नखक्षतदन्तक्षतमर्द्दनेष्वपि भद्रं यस्मिन् ।) सुरतम् । इति त्रिकाण्डशेषः ॥
त्रिभुवनं, क्ली, त्रयाणां भुवनानां समाहारः । (तद्धितार्थेत्यादिना समासः । पात्रादित्वात् न ङीप् । पा । २ । ४ । १७ ।) त्रिलोकी । इति व्याकरणम् ॥ (यथा, भागवते । ३ । ११ । ३० ।
"तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः ।
प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्म्मयः ॥")
त्रिमदः, पुं, (त्रयानां मदानां समाहारः । अभिधानात् पुंस्त्वम् ।) मुस्ताचित्रकविड़ङ्गानि । इति वैद्यकम् ॥ (यथा, वैद्यकपरिभाषायाम् ।
विड़ङ्गमुस्तचित्राश्च त्रिमदः समुदाहृतः ॥"
त्रिगुणितो मदः । विद्याधनाभिजनोत्पन्नं गर्व्वत्रयम् । यथा, भागवते । ३ । १ । ४३ ।
"नूनं नृपाणां त्रिमदोत्पथानां
महीं मुहुश्चालयतां चमूभिः ।
वधात् प्रपन्नार्त्तिजिहीर्षयेशो
ह्युपैक्षताघं भगवान् कुरूणाम् ॥")
त्रिमधु, क्ली, (त्रयाणां मधूनां मधुराणां समाहारः ।) मिलितसितामाक्षिकसर्पींषि । तत्पर्य्यायः । मधुरत्रयम् २ मधुत्रयम् ३ । इति राजनिर्घण्टः ॥
त्रिमधुः, पुं, (मधुवाता इत्यादयस्त्रयो मधुशब्दा यत्र ।) ऋग्वेदैकदेशः । (यथा, ऋग्वेदे । १ । ९० । ६—८ ।
"मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्य्यः ।
माध्वीर्गावो भवन्तु नः ॥")